श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीविष्णु पुराणे प्रह्लाद कृत

# ॥ श्रीनृसिंह स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनृसिंह स्तोत्रम् ॥

प्रह्लादः

नमस्ते पुण्डरीकाक्ष नमस्ते पुरुषोत्तम।
नमस्ते सर्वलोकात्मन् नमस्ते तिग्मचक्रिणे॥ १ ॥

नमस्ते वासुदेवाय नमस्ते करुणाकर।
नमस्ते विश्वरूपाय नमस्ते सर्वमूर्तये॥ २ ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥ ३ ॥

ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते पुनः।
रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्तये॥ ४ ॥

देवा यक्षाः सुराः सिद्धा नागा गन्धर्वकिन्नराः।
पिशाचा राक्षसाश्चैव मनुष्याः पशवस्तथा॥ ५ ॥

पक्षिणस्स्थावराश्चैव पिपीलिकसरीसृपाः।
भूम्यापोऽग्निर्नभो वायुः शब्दस्स्पर्शस्तथा रसः॥ ६ ॥

रूपं गन्धो मनो बुद्धिः आत्मा कालस्तथा गुणाः।
एतेषां परमार्थश्च सर्वमेतत् त्वमच्युत॥ ७ ॥

विद्याविद्ये भवान् सत्यं असत्यं त्वं विषामृते।
प्रवृत्तं च निवृत्तं च कर्म वेदोदितं भवान्॥ ८ ॥

समस्तकर्मभोक्ता च कर्मोपकरणानि च।
त्वमेव विष्णो सर्वाणि सर्वकर्मफलं च यत्॥ ९ ॥

मय्यन्यत्र तथाऽशेषभूतेषु भुवनेषु च।
तवैव व्याप्तिरैश्वर्यगुणसंसूचिकी प्रभो॥ १० ॥

www.prapatti.com

त्वां योगिनश्चिन्तयन्ति त्वां यजन्ति च याजकाः।
हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृत्॥ ११ ॥

रूपं महत् ते स्थितमत्र विश्वं
ततश्च सूक्ष्मं जगदेतदीश।
रूपाणि सूक्ष्माणि च भूतभेदाः
तेष्वन्तरात्माख्यमतीव सूक्ष्मम्॥ १२ ॥

तस्माच्च सूक्ष्मादिविशेषणानाम्
अगोचरे यत्परमात्मरूपम्।
किमप्यचिन्त्यं तव रूपमस्ति
तस्मै नमस्ते पुरुषोत्तमाय॥ १३ ॥

सर्वभूतेषु सर्वात्मन् या शक्तिरपरा तव।
गुणाश्रया नमस्तस्यै शाश्वतायै सुरेश्वर॥ १४ ॥

याऽतीतगोचरा वाचां मनसां चाविशेषणा।
ज्ञानिज्ञानपरिच्छेद्या तां वन्दे चैश्वरीं पराम्॥ १५ ॥

ओं नमो वासुदेवाय तस्मै भगवते सदा।
व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य यः॥ १६ ॥

नमस्तस्मै नमस्तस्मै नमस्तस्मै महात्मने।
नाम रूपं न यस्यास्ति योऽस्तित्वेनोपलभ्यते॥ १७ ॥

यस्यावताररूपाणि समर्चन्ति दिवौकसः।
अपश्यन्तः परं रूपं नमस्तस्मै महात्मने॥ १८ ॥

योऽन्तस्तिष्ठन्नशेषस्य पश्यतीशः शुभाशुभम्।
तं सर्वसाक्षिणं विष्णुं नमस्ते परमेश्वरम्॥ १९ ॥

नमोऽस्तु विष्णवे तस्मै यस्याभिन्नमिदं जगत्।
ध्येयस्स जगतामाद्यः स प्रसीदतु मेऽव्ययः॥ २० ॥

www.prapatti.com

यत्रोतमेतत्प्रोतं च विश्वमक्षरसंज्ञके।
आधारभूतस्सर्वस्य स प्रसीदतु मे हरिः॥ २१॥

ओं नमो विष्णवे तस्मै नमस्तस्मै पुनः पुनः।
यत्र सर्वं यतः सर्वं यः सर्वं सर्वसंश्रयः॥ २२॥

सर्वगत्वादनन्तस्य स एवाहमवस्थितः।
मत्तस्सर्वमहं सर्वं मयि सर्वं सनातने॥ २३॥

अहमेवाक्षयो नित्यः परमात्माऽऽत्मसंश्रयः।
ब्रह्मसंज्ञोऽहमेवाग्रे तथाऽन्ते च परः पुमान्॥ २४॥

॥ इति श्रीनृसिंह स्तोत्रं समाप्तम्॥

www.prapatti.com